# क्रियापदं किं कथयति? – १

**'क्रियापदम्' इति वाक्यस्य महत्त्वपूर्णम् अङ्गम् ।**

**बालक:** ग्रन्थं **पठति** । इति वाक्ये '**पठति**' इति क्रियापदम् ।

तेन कस्य बोध: भवति ?

(१) पठनस्य क्रिया ✓

(२) परस्मैपदम् ✓

(३) प्रथम: पुरुष: ✓

(४) एकवचनम् ✓

(५) लट्लकार: ✓

(६) धातो: गणविकरणम् ✓

(७) कर्तु: पुरुष: वचनं च ?

**अधुना एतानि वाक्यानि पठत ।**

(१) **बालक:** ग्रन्थं **पठति** ।

(२) **बालकौ** ग्रन्थं **पठत:** ।

(३) **बालका:** ग्रन्थं **पठन्ति** ।

(४) **अहं** ग्रन्थं **पठामि** ।

(५) **त्वं** ग्रन्थं **पठसि** ।


एतेषु वाक्येषु क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति । यदि कर्तृपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अत: कर्तृप्रधानानि वाक्यानि इमानि ।

'**पठति**' इति क्रियापदस्य श्रवणेनैव कर्ता प्रथमपुरुषस्य एकवचने इति ज्ञायते । तथैव '**पठामि**' इति पदेन कर्ता उत्तमपुरुषस्य एकवचने इति स्पष्टं भवति । एवं क्रियापदेन कर्तृपदस्य पुरुषस्य वचनस्य अपि बोध: भवति ।

**कर्तृवाच्य: प्रयोग: । (कर्तरि प्रयोग:)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| **प्रथमा विभक्ति:** | द्वितीया विभक्ति: | **कर्तृपदस्य पुरुषवचनानुसारम्** |


(१) मधुरा सुधाखण्डान् आनयति ।




**क्रियापदं कर्तृपदम् अनुसरति ।**

**अत: कर्तृवाच्यं क्रियापदम् इदम् ।**

२) वयं ग्रन्थं पठाम: ।




**क्रियापदं कर्तृपदम् अनुसरति ।**

**अत: कर्तृवाच्यं क्रियापदम् इदम् ।**